विनायकपूंगनिः

४४५३

4453

F = 15

ड्ढं ह्र स्वरफैरास्वे स्वर प्रन
रतै नै स्वर त्री॰ ॐ कारे स्वर स्त्री॰
स्वबीभ्रूकते स्वर स्वोई ह्र स्वकै

गोपालजी। विभागो

श्रीः अथ रविनायकशांतिर्लिख्यते। तत्र शुभे दिने यथोक्तं भूमिशोधनं मंडपकरणं
यथोक्तं कुंडपीठादिकरणं विधिवत् गणपतिपूजनं। पश्चाद्गौर्यांबिकयोः पूजनं त
त्पुरुषायेति। ततः मातृपूजा पूर्वकमाभ्युदयिकं कृत्वा। पश्चात्प्रधानसंकल्पं कुर्यात्।
सुमुखश्चेत्यादि। अद्येत्यादि॰ थें मम सुतस्य विवाहोत्सवकर्मप्रारंभनिमित्तं अवि
घ्नेन॰ कर्मणां सिध्यर्थं विनायकोपसर्गनिवृत्यर्थं आदित्यादिनवग्रहसूचितपीडोप
शांत्यर्थं परमाभ्युदयार्थं श्रीगणेशांबिकयोः सुप्रसन्नार्थं नवग्रहमखयुतविना २
यकशांतिकर्मकर्माहं करिष्ये। तदंगत्वेन आचार्यप्रमु[illegible]खानां ऋत्विजानां अर्घसं
पादनमहं करिष्ये। स्वागतवो॰ तां। प्र॰ प्र॰ मि॰। अस्मिन्नवग्रहमखयुतविनायकशां

न्ति कर्मणि आचार्य एतत्ते पाद्यं। एवं सर्वेषां। स्वपादौ प्रक्षाल्याचम्य प्राणायामः। अपवि
त्रेत्यादि। वरणोपहाराणां पवित्रताऽस्तु। भूरादि उपासे गायत्रेत्यादि मच्छुत्यं तेनय
वरविकीर्णं। अद्यादि॰ ममसुतस्य विवाहोत्सव कर्मणि नवग्रहमखपूर्वकविनायक
शान्तिकर्मणि आचार्यप्रमुखानां स्वस्तिवाचकानां ऋत्विजां जापकानां च वरणं ऽहं
च पुण्याहवाचनमहं करिष्ये। ततो यवान् गृहीत्वा दक्षिणजानुस्थरान्। अमुकसगो
त्र अमुकशर्मन् वस्त्रयुग्मदक्षिणेन विनायकशान्तिकर्मणि धेन्वाद्युक्तदक्षिणे
न नवग्रहमखेन च अहं यजे। तत्र मे त्वं आचार्यो भव। वृतं ऋत्विजां नवतः। एवं सर्वत्र।
इदम् अर्घ्यादि पूजा। यथा दत्तं गंधाद्यर्चितं ॐ ऽद्य शुद्धिका वस्त्र प्रत्याम्नाय संकल्पितं द्रव्यं

इमानि अर्चितानि इत्यो नीविः। आचमनं। अर्चनविधे[illegible]। [illegible] नमो। १

दक्षिणतो ब्रह्मासनादि पात्रासादने विशेषः। गौरसर्षपकल्कैः सर्षपतैलैः। औदुंबरस्रुवं चरुस्थाली इत्यादि। मितायस मिताय श्रान्ताय कर्दं कूटाय कूष्माण्डाय राजपुत्राय [illegible]। आदित्याय सोमाय भौमाय बुधाय बृहस्पतये शुक्रा

आचार्यप्रमुखेभ्यः आहं सप्र[illegible] योयो। श्रुतां दक्षिणापात्रेत्यादि स्वस्तिमित्यन्ताः।

अस्य कृतस्य वर्णाचंनकर्मणो यन्न्यूनातिरिक्तं तत्सर्वं परिपूर्णमस्तु। मागल्यं आशिर्वादः।

ततो नारिकेरं गृहीत्वा। अस्य यागस्य निष्पत्तौ भवन्तो भ्यर्थिता मयास्तु प्रसादं प्रक

र्त्तव्यं शान्तिकं विधिपूर्वकं इति प्रार्थनं। ततो ओं ड्कें डिजेवा पंचभूसंस्कारां कृत्वाऽग्नि

स्थापनं। ततो भद्रासनकल्पनं। उपरि आनडुहचर्मास्तरणं प्राग्ग्रीवं। चर्मोपरि श्रीपर्णिका

कृतनिर्मितं पीठस्थापनं। तदुपरि घृतवस्त्रेणाच्छादनं। तदुपरि ओं कुंभेनाष्टदलं कृत्वा।

परितश्चतुर्दिक्षु कलशस्थापनं भूरसीत्यादिभिर्मंत्रैः। तन्मध्ये पंचमृत्तिकादिप्रमान

स्थो केति। तत्र चंदनागुरुकस्तूरीकर्पूररोचनगुग्गुलुनिर्लिप्ते। अर्हः कुम्भानेतेति मन्त्रेण। दति

तत्र गणेशपीठे रक्तवस्त्रधान्योपरि गणेशाम्बिकयोः स्थापनं। अश्मरुप्तमारणं समुद्रस्य इति

॥

ततो ग्रहस्थापनं। तथा। रक्तमंडलमादित्ये चतुरस्रं निशाकरे॥ महीपुत्रे त्रिकोणं स्याद्बुधे वै बाणसन्निभं॥ गुर्वे रेपद्माकारं पंचकोणं तु भार्गवे। धनुषाकृति मंदे वै सूर्पाकारं तु राहवे। ध्वजाकारं तु केतूनां मंडलान्येवमादिशेत्॥ मध्ये तु नाकरं विद्यात् खन्निपूर्वदक्षिणे। दक्षिणे लोहितं विद्याद्बुधं पूर्वोत्तरेण तु। उत्तरेण गुरुं विद्यात् पूर्वेणैव तु भार्गवं। पश्चिमेन शनिं विद्याद्राहुं दक्षिणपश्चिमे। पश्चिमोत्तरतः केतुं स्थापयेच्छुक्लतंडुलैः॥ ॥ भोभो सूर्य इहागच्छ इहतिष्ठ कलिंगदेशोद्भव। रक्तकाश्यपगोत्र यस्य दक्षिणभुजः पद्मलांछन। सप्ताश्ववाह गंछ पद्ममध्ये वरदः॥ अग्निं दूतेति मंत्रेण रुद्ररूपी प्रतिष्ठितः। अग्निं दूतं० ॐ भूर्भुवः स्वः सूर्यं स्थापयामि।

अहो चंद्र जगत्प्राण यमुनाविषयोद्भव। स्वस्थेतात्रेयगोत्रेय गदापाणिवरप्रद
दत्तात्र्यवाहनायाहि नमा रूपी समाविश। कृत्वा आनंदलेखे मंत्रेणाप्यग्निना विधि
ध्येसर्वत्र हो तार अप्यग्ने॰ ॐ भूः चं॰ इं स्वा॰ नि॰ २ ॐ आग्नेय्यां समुत्पन्न भो भो भौम चतुर्भुज अभ
यं॰ २ रक्ताङ्ग ऊर्जे जातः शूलशक्तिगदाधरः। वरदो मेषमारूढ स्वं देशाय तडित्प्रभो।
स्योनापृथिवि मंत्रेण दलेयाम्ये प्रतिष्ठितः। ॐ भौमं स्वा॰ २३ अहो चंद्रसुत श्रीमान्
मागधायां समुद्भव। अत्रिगोत्र चतुर्बाहो खड्गखेटकधारक। गदावरद सिंह ३
स्थः स्वर्णाभः समाविश। सक्षव ईशानपत्रे चंद्रदं विष्णुः प्रपूजितः। ॐ बुधं स्वा॰ ४
अहो वाचस्पते पीत संजातः सिंधुमंडले। एह्यांगिरस गोत्रेय हयारूढ चतुर्भुज।

दंडाक्षसूत्रवरदः कमंडलुधरप्रभो। महोऽङ्गद्भिरिति संपूज्यो विधिवद्गुरुरेदजो॥ भूः॰
गुरुं स्वा॰ ।५ नोनोनोज्ञ कटे जातः शुक्रः श्वेताश्ववाहनः। समागच्छ चलु बहिर्भृगुगो-
त्र खिन्नूषणः। परिघाक्षा बलीहस्त कमंडलुधरप्रभो। पूर्वपत्रेति शुक्रस्य शुक्र ज्यो-
ति प्रपूजितः॥ भूः॰ शुक्रं॰ ।६ अहो सौराष्ट्रसंजातश्छायापुत्र चलुर्भुजः। कृष्णवर्णार्क-
गोत्रय बाणहस्त धनुर्द्धरः। त्रिशूली च समागच्छ वरदो गृध्रवाहनः। प्रजापतेति संपू-
ज्यो विधिवत्पश्चिमे दले। भूः॰ शनिं स्वा॰ ।७ राहो बर्बरके देशे संजातः कायवर्जितः।
गोत्रे पैठीनसेर्होहि सिंहारूढो वरप्रदः। करालवदनश्चैष्ठकालरूपां जनप्रभो। आ-
यं गौरितिमंत्रेण दूर्ज्यो नैर्ऋतिपत्रके। भूः॰ राहुं॰ ।८ केतवो विविधाकारा मलयाद्रिस-

भुक्तवः॥ रुद्रि ष्ठ जाडै मिनेगोत्रे गदा हस्ता वर प्रदः॥ आगच्छंतु कदो ल स्त्वा त्रौ भने भाक्ते
ते दलो॥ ब्रह्म जज्ञान मंत्रेण श्वित्रगुम मिवार्चितः॥ ब्रह्मजज्ञानं॰ ॐ भूर्भुवः स्वः केतुं
स्थापयामि॥८॥ एवं ग्रहान्प्रतिष्ठाप्य स्थापनीयाश्च देवताः॥ तेषां स्थानानि नामानि
मंत्रांश्च प्रवदाम्यहं॥ रुद्रं त्र्यंबकमंत्रेण रवेरुत्तरतो न्यसेत्॥ ॐ त्र्यंबकं यजामहे॰ ॐ भू
५ र्भुवः स्वः रुद्रं स्थापयामि एवं सर्वत्र ज्ञेयं॥१॥ सोमस्याग्नेयदिग्भागे श्रीयते मेनकात्म
जां॥२॥ यदक्रंदेति सोमस्य स्कंदं याम्ये प्रपूजयेत्॥३॥ विष्णुं विष्णो रराटेति यजेत्सूर्वे ४
बुधस्य च॥४॥ गुरोरुत्तरतो भ्यर्च्य ब्रह्माणं ब्रह्मेति मंत्रतः॥५॥ सजोषा इति शक्रस्य प्राच्यां
त्वाकं नियोजयेत्॥६॥ यानेः पश्चिमतः स्थापयेत् यमाय त्वेत्यृचा यमः॥७॥ काषीरसीति मे

केचिदनंतर्नां वाद्योनागाः प्रत्यधिदेवतामन्यंते। तन्मध्ये तद्दृतिर्भोदोग्यभाष्यपद्विशिष्टा दवगते मस्माभिर्द्वात्रिंश देवतास्थापादिति॥१०

त्रेण राहोः कालेतयोत्तरे। ८ चित्रगुप्तंचकेतूनां चित्रावस्विति नैर्ऋते। ९ अयहादि देवताः ख्याताः शृणुष्वप्रत्यधिदेवता॥ यांभोस्य भवेद्दक्षिः सनंपितेप्रतिष्ठितः। अग्निः। अपोऽस्मदेवेति मंत्रेण उमायानैर्ऋते। १ पः। रधरास्कंदा चवायव्ये विदसीति प्रतिष्ठितः। २ इदंविष्णुर्विचक्रमे इति मंत्रेण विष्णोर्नारायणोत्तरे। ३ ब्रह्मोत्तरेच इंद्रस्य इंद्र आसामि तीडितः। ४ इंद्रं देवीरिति मंत्रेण इंद्राणीशक्रपश्चिमे। ५ प्रजापतिर्यमस्याग्रे प्रजापत त इलीडितः। ६ नमोस्तु मंत्रतः स्थाप्याः पन्नगाः कालपश्चिमे। ७ ईशाने चित्रगुप्तस्य ब्रह्मजज्ञेति पन्मूः। ८ अथ पंचलोकपालाः। ईशानेः केतोस्तु पूर्वेण गुरोः सूर्यस्य पश्चिमे। गणनाथं गणानांत्वा। १ दुर्गाणं जातवेदसे। २ वायोये ते तथा वायुं ३ खं घृतं

अथ प्रत्यधिदेवता। ग्रहदेवतयोमध्ये आनो भद्रानुवाकेन यथाक्रमं स्थापयेत्। १२ खंघृतं ५ तदि

अनंत० १ या ककिं २ तहंकं ३ ककोटकं ८ ऊ ति द ९

अश्विनौ

तपेति चायावा कृष्णेति मंत्रेण लोकपालाश्च पूजयेत्॥ अथ नक्षत्राः॥ सस्मस्मयजेऽश्विनि

प्राग्गादक्षिणे पूर्ववत्। अश्विना तेजसाश्विन्यां। यमाय भरणी तथा। कृत्तिका वायमग्निः सहर्षितिणः

सब्रह्म जज्ञेति रोहिणी। सोमो धेन्विति सौम्यं च नमस्ते रुद्र रौद्र नो। अदितिर्द्यौः पुनर्वसु

पुष्यं वाचस्पते न तत्। नमोऽस्तु सर्प देवत्यं पितृभ्यः पितृदैवतं। भगप्रणेतर्भगो यं तु देव्या उद्धा

त्वष्टा तुरीप वथ यूर्यम्। हस्तं विभ्राड् मंत्रेण त्वाष्ट्रं त्वष्टेति पूजयेत्। पीवो अन्नेति वायव्यं इंद्राग्नी

तु इंद्र दैवतं। नमो मित्रेति मैत्रं तु सद्भुः हस्तः पुरंदरः। मूलं मा तो वसुत्रेति पूर्वाषा

ढा मपाघ मा विश्वे [illegible] अश्वेति विश्वे रांगा यत्र्या जिज्ञिती न्यसेत्॥ श्रवणं विष्णुमंत्रे

ण धनिष्ठा वसुधारया। पंचवारुणं वारुण्यं मज पाद्रुत नो हितः। हि तो नामेत्य हि बुध्न्यं पौष्णं पूषं

शत-भा। पूर्वा उत्तरा तवेत्त च। दस्ति रेवतां

तत्र। पद्मनेत्रयोर्मध्ये ईशाने एकपुंजके। योगे योगेति मंत्रेण विष्णुं नादीन्प्रपूजयेत्॥
नद्रुकर्णेति रंतं स्यादाग्नेय्यां करणं स्थिति। देवाधिदेवयोर्वह्नि॰ आदित्यस्य तु मं
डले। ध्रुवासीति ध्रुवं मध्ये ग्रहाणां तु सतारकं॥ सूर्यात्पश्चिमभागे तु स्थापयेत्ता
ञ्च बाह्यतः। गंगाद्याः सरितः सर्वाः पंचनद्येति मंत्रतः॥ रवेरुत्तरदिग्भागे गुह्
मार्तंडमध्यतः। सप्तऋषीरिति मंत्रेण ऋषीणामर्चनं शुभं। प्रतीचीवरुणकाष्ठायाम
धस्तात्सरितां तथा। सागरांश्चैव सप्ताश्च इमं मेति प्रपूजयेत्॥ अंतराधिष्ण्यपंक्ति
कौबेर्यां पद्मबाह्यतः। प्र पर्वतेति मंत्रेण पर्वतान्स्थापयेत्ततः॥ आदित्यात्पश्चिमे
भागे अधस्तात्तत्र तु क्रमात्। अजवीयस्वेति मंत्रेण रेवंतं पूजयेत्ततः। सुपर्णोसीति

मंत्रेण गंधाक्षतं संपूजयेत् ॥ बुधस्य मंडले वायव्ये विष्णोः समीप एव च ॥ ततो ईशाने
रुद्रकलशस्थापनं ॥ तद्यथा ॥ भूरसीत्यादिमंत्रैस्तु कलशो स्तु प्रतिष्ठितो ॥ असंख्या
तेति संपूज्यो रुद्रो रुद्रघटां न्यसेत् ॥ असंख्याता ॥ सि० ॐ भूर्भुवस्वः रुद्रं स्थापयामि ॥ तत्र ॥
पूज्यो विष्णुश्च सर्वकेन वामे दक्षे प्रजापतिः ॥ सर्पाणां मध्यतो राहुमंडले निर्ऋतौ
दिशि ॥ चतुःषष्टिपदो वास्तु वास्तोष्पतेति पूजयेत् ॥ केतुमंडलमध्ये तु ब्रह्मणः सा
6 यतस्तथा ॥ नमोस्त्वित्यादिमंत्रेण क्षेत्रपालान् प्रपूजयेत् ॥ रुद्रकुंभाग्रतः पूज्या ६
चामुंडा जातवेदसे ॥ सोमाय कुबेरदिग्भागे अधस्ताद् ब्रह्मचारिणः ॥ यावः कोबेति
मंत्रेण स्थापयेन्मातृमंडलं ॥ अथ वेदाः ॥ ऋग्वेदं पूर्वतः स्थाप्य अग्निमीळेत्यृचा रवेः ॥

वास्तोष्पते प्रतिजानीह्यस्मां स्वावेशो अनमीवो भवा नः ॥ यत्त्वेमहे प्रति तन्नो जुषस्व शंनो भव द्विपदे शं
चतुष्पदे ॥

इषेत्वा इति मंत्रेण यजुर्वेदस्य दक्षिणे। अग्न आयाहि मंत्रेण सामवेदस्य पश्चिमे। शंनोदेवी
ति मंत्रेण अथर्वण मितोत्तरे॥ ततः प्रागादिक्रमेण पञ्च बाह्यान्दिक्पतीन्सूर्याभिमु
खान्स्थापयेत्। यथा। इंद्रं त्रातारमिंद्रेणेत्यस्तो अग्ने ऊतारो नो। यमं स्तुगन्नुपथेति
अस्तुन्वं तेतितिने कृत्तं॥ तत्वायामि जलाध्यक्षं वायुमानोऽनियुक्तिना। वयं सोमेति धन
दं तमीशानेति शंकरं॥ अस्मिन्रुद्रास्त्वितो अहला स्थाना पृथिवीतितो हरिं॥ ततो मनोज
तिरिति प्रतिष्ठानवग्रहाः स्थापितदेवता सहिताः सकलग्रहाः सुप्रतिष्ठितावरदा भ
वन्तु॥ अद्येत्यादि· [illegible] र्थे। विनायकोपसर्गनिवृत्यर्थं गणेशांबिकयोः पूजनमहं क
रिष्ये। तत्पुरुषायेत्यादि इदमर्घ्यादि पूजा। अद्येत्यादि· र्थे। आदित्यादिनवग्रहाणां स्था

कस्तूरिकाया द्वौ भागौ द्वौ भागौ चंदनस्य च। ॐ ॐ मस्यन्त्रयशैव चलकं समभिदस्मृतं पर

पितृदेवतासहितानां इत्जनमहं करिष्ये। आदित्यादिनवग्रहेभ्यः सत्पितृदेवतासहि
तेभ्यः इदमर्घ्यं। इदं चंदनं। मंत्र यथा। श्रीखंड भार्गवे चंद्रे भौमे कुंकुमचंदनं। बुधे जीवे च कुं
समं शेषाणां ॐ ॐ मं स्मृतं। आपालकेत्यादिमंत्रेण चंदनादि प्रकल्पयेत्। … पुष्पं। यथा।
7 हयारि अस्तु मैः स्तर्यं अमुदैः सोममर्चयेत्। क्षितिजं तु जपापुष्पैः चंपकैः सोमनंदनं
शतपत्रैर्गुरुः शुक्रो जातीपुष्पैः शनैः भार्गवा मल्लिका कुसुमैः एं गु ॐ इदं पुष्पं विधुं तु दंष्ट्र
केतुं नानाविधैः पुष्पैः कं तु कालोद्भवैः कुसुमैः। एष धूपः। यथा। ॐ दत्सा … रव्यं रवे धूपं
तदुजाऽर्घं निशाकरे। सर्जरसं महीपुत्रे बुधे जीवे ऽगरुं स्मृतं। सान्ये बिल्वे गरं स्तु त्रो
शनैर्दद्याद्गुग्गुलुं। राहो जाहा न खंड केतो मंत्रेण धूपसीतिव। दीपं। यथा। नववर्त्ति
धूपो देय सगुग्गुलुरियाज्ञवल्क्यो कृत्वा॥

युतं दीपं घृतेन परिपूरितं। घ्राणमग्रतः अर्थात् तेजोसीति प्रकल्पितं॥ नैवेद्यं। गुडोन्नं
खीर कांसारं दुग्धान्नं दधि मधुकं। घृताक्तं ऊनारा माखा विविधान्नं गुडादिकं॥ फलानि।
द्राक्षे स्त्रुवूस नारिंगं जंबीरं बीजपूरकं। उत्तती नारिकेरं च दाडिमानि फलानि च॥ इति
लघुपूजा। ततः कुंडे समागत्य निर्वत्याग्निक्रियां च कं। अपयित्वा ततो होमः कर्तव्यः खेचरोन्नमिरा
स्र[illegible]ते हविः। षि स्त्रुव प्रतपना घाघारावाज्य भागांतं कृत्वा॥ ततो यजमानस्य आचार्यव
स्त्रद्वयं देयात्॥ परिधास्येति वस्त्र परिधानं। अथोत्तरीयेत्युत्तरीयं। तानाजद्भासनोप
रि उपवेशय। आचार्य कूर्चेन यजमानस्य मस्तकाद्दारभ्य आपादात्॥ पोंछे। पश्चात् स्त्रुवा
सिनी चत्वारि पोछे। स्त्रुहासिनीने मोदु घाटडी आपौं दत्वा चारं कृत्वा। पश्चात् यजमानऊ
सर्वौषधैः सर्वगंधैः शिरोविलेपनं ततः १

भाभ्यां हस्ताभ्यां तांम्र कलशमादाय ... स्ति वाचनं कुर्यात्॥ ततः स्वस्ति वाचनं कृत्वा।

अस्मिन् विनायकस्नपनांगभूत स्वस्तिवाचन कर्मणः प्रतिष्ठासिध्यर्थं हिरण्य दक्षि

णां स्वस्तिवाचकेभ्यो ब्राह्मणेभ्यः अहं संप्रददे॥ योयो विभा॰ तां॥ अस्य विनायकस्नपन

कर्मणि इमानि वस्त्रादि ... सु शोणित खंडवस्त्राणि मांजिष्ठरंजितानि बृहस्पति देव

तानि जगज्जननी अंबिका प्रीत्यर्थं चतसृभ्यः सौहासिनीभ्यः अहं संप्रददे॥ योयो वि॰

तां॥ ... अस्य विनायकस्नपनकर्मणि न्यूनातिरिक्त दोषनिवृत्यर्थं हास्य

मानां भूयसीं दक्षिणां नानागोत्रेभ्यो ब्राह्मणेभ्यः संप्रददे॥ एवं दक्षिणा कालेः दक्षिणां पां

वित्याद्दि स्वस्तीत्यंतां॥ अस्य सतस्य ... विनायकस्नपनांगभूत स्वस्तिवाचन कर्मकर्मणेय

न्यूना० नमस्का। गृहेद० नमस्का। पश्चात् सौहासिनीपोषा। तेभ्यः रक्तवस्त्रदानं। ततः पूर्वकल
शमादाय। अभिषेकः। तत्र मंत्रः। सहस्राक्षं शतधारमृषि[illegible]भिः पावनं कृतं। तेन त्वामभिषिं
चामि पावमान्यः पुनंतु ते। ततो दक्षिणकलशमादाय। भगं ते वरुणो राजा भगं सूर्यो बृह
स्पतिः। भगमिंद्रश्च वायुश्च भगं सप्तऋषयो ददुः॥ ततः पश्चिमकलशमादाय। यत्ते केशे
षु दौर्भाग्यं सीमंते यच्च मूर्द्धनि। ललाटे कर्णयो रक्ष्णोरापस्तद्घ्नंतु ते सदा॥ ततः उत्तरकलशमा
दाय। सहस्राक्षं श०तो। भगं ते वरु० दुः। यत्ते केशेषु० सदा॥ इत्यभिषेकं [illegible]पादादिविनियोगं।
ततः औदुंबरस्रुवेण यजमानस्य मूर्द्ध्नि सव्येन ऊर्ध्वान् प्रागग्रां धृत्वा। दक्षिणहस्तेन सार्षप
तैलहोमः। ॐ मितायस्वाहा। इदं मिताय०। ॐ संमितायस्वाहा। इदं संमिताय०। ॐ आजायस्वाहा। इदं आजाय०।

कटंकटाय स्वाहा। इदं कटंकटाय। ॐ कूष्मांडाय स्वाहा। इदं कूष्मांडाय। राजपुत्राय स्वाहा। इदं
राजपुत्राय। ततो यजमानस्नानं स्वेच्छया॥ वस्त्रपरिधानं। अनुलेपनं। ततः यजमान दक्षि
णतउपविष्टे मिताये त्यादिभिः षड्भिर्मंत्रैराचार्यः अरूहोमं कुर्यात्॥ ततः वरुणस्योत्तंभनमि
त्यादिना पंचावारुणहोमः। इदं वरुणाय। प्रतित्यागं नममेत्यावर्तनं॥ वह्निहस्तावजेदर्तनं इष्टिकेचित्॥
अथ ग्रहाणां होमः। ततो समिद्धोमः। अर्कः १ पलाशः २ खदिरः ३ अपामार्गो ४ पिप्पलो ५ औदुंबरः ६
शमी ७ दूर्वा ८ कुशाश्चेति समिधः क्रमात्। आत्मक्लेन इमं देवा अग्निर्मूर्द्धा ३ उद्बुध्यस्व ४ बृह ६
स्पते अति ५ अन्नात्परिस्रुतः ६ शं नो देवी ७ कांडात्कांडात् ८ केतुं कृण्वन्नित्येभिर्मंत्रैः प्रति
मंत्रं होतव्याः। ग्रहाणां स्थापनमंत्रैः स्विस्त्र स्विस्त्र समिद्धोमः। ततः आज्यहोमः। आत्मक्ले
शो

नेत्यादिभिर्मन्त्रैः॥ एभिर्मन्त्रैश्चरुहोमः॥ पश्चाद्देवतानां अधिदेवतानां स्थापितदेवतासहि
तानां च स्थापनमन्त्रेण तिलैर्होमः॥ स्वि[illegible]ग्निकार्यः॥ आकृति संख्या २ देवतानां अष्टो
अधिदेवतानाय तस्त्रः श्रोषाद्दुर्हुः॥ तिलहोमो ब्रह्मत्वासाशारे। ततः स्विष्टकृदादि प्राजा
पत्यान्तं॥ ततः गणेशाम्बिकयोः पूजनं षोडशानि रूपचारैः॥ तथा। आचमनं प्राणायामः॥ स्व
नदं दृः॥ अद्येत्यादि-र्थी। मम सुतस्य विवाहोत्सव कर्मप्रारम्भनिमित्तं अविघ्नेन कर्मणां
सिध्यर्थं मम सपरिवारस्य सर्वदुरितोपशान्त्यर्थं आयुर्बोभिवृध्यर्थं परमाभ्युदयार्थं
विनायकोपसर्गनिवृत्यर्थं श्रीजगज्जननीअम्बिकासुप्रसन्नार्थं चास्तोक्तफलावाप्त्यर्थं
अस्मिन्क्रियमाणे विनायकाम्बिकयोः पूजनार्चनमहं करिष्ये। तत्पुरुषायेति मन्त्रेण गो

डक्तोपचारैः पूजयेत्। यथा। तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि। तन्नो दंती प्रचोदयात्।
तत्पुरुषाय वक्रतुंडाय दं[ ]तिने इदमर्घ्यं। एवं इदं चंदनं। इमानि पुष्पाणि। एष धूपः।
एष दीपः। इदं वैश्वदेव सर्पिस्खंखंताखंतादिभिः संपादितं नैवेद्यं गंधपुष्पाद्यर्चितं तत्पुरु
षाय [ ] वक्रतुंडाय दंतिने इदं नैवेद्यं परिकल्पयामि। ततः सुभगायै विद्महे काममालिन्यै
धीमहि। तन्नो गौरी प्रचोदयात्। सुभगायै काममालिन्यै गौर्यै इदमर्घ्यं। इदं चंदनं। इमानि
10 पुष्पाणि। एष धूपः। एष दीपः। द्वितीय सर्पिस्खंखंताखंतादिभिः संपादितं नैवेद्यं। अंबिका १०
यै सुभगायै काममालिन्यै गौर्यै इदं नैवेद्यं परिकल्पयामि। अर्घ्य। पत्र पुष्पं० चाग० फलं।
तत्पुरुषाय दं[ ]तिने इदं नारिकेरमयं अर्घ्यं परिकल्पयामि। एवं भगवत्यै। सुभगायै काममा

लिन्यै गौर्यै एष नालिकेरमयं अर्घं परिकल्पयामि। ततः आरात्रिकं अग्निर्देवतेति। ततः दूर्वास
र्षपं पुष्पान्यामं जलिं क्षर्यत सुरूपायै इति पुष्पांजलिं। दानं हृयोः। ततः उपस्थानं। रूपं देहि
यशो देहि भाग्यं भगवन् देहि मे। पुत्रो देहि धनं देहि सर्वान्कामांश्च देहि मे। रूपं देहि॰ भाग्यं
भगवति देहि मे। पुत्रां देहि॰ मे। ॰अंबिकायै नमः। अस्य गणेशांबिकयोः पूजन समृध्य
र्थं यथासंपन्नान्नेन तत्त्रिपर्यंतेन चतुरो ब्राह्मणान् अहं तर्पयिष्ये। तेन भगवत्यौ विघ्नविना
यकौ प्रीयेतां। अस्य गणेशांबिकयोः पूजन प्रतिष्ठार्थं हिरण्यदक्षिणां निष्क्रयेण यथा
संपन्नं द्रव्यं नानागोत्रेभ्यो ब्राह्मणेभ्यः अहं संप्रददे। अस्य विनायकांबिकयोः पूजनकर्म
कर्मणो न्यूनं येनातिरिक्तं सर्वं परिपूर्णमस्तु। गृहे वृद्धिश्राद्धानि भवंतु। तत्र कर्म एष विघ्नमस्तु।

ॐ भूर्भुवः स्वः रुद्राय नमः एवं सर्वत्र ॥ मेन कालमनाय ॥ स्कंदाय ॥ विष्णवे ॥ ब्रह्माय ॥ शक्राय ॥ यमाय ॥ कालाय ॥ चित्रगुप्ताय ॥
अग्नये ॥ अपाय ॥ धराय ॥ नारायणाय ॥ इंद्राय ॥ इंद्राण्यै ॥ प्रजापतये ॥ पन्नगाय ॥ ब्रह्मणे ॥ गणपतये ॥ दुर्गायै ॥ वायवे ॥
अंतरिक्षाय ॥ अश्विभ्यां ॥ ३३ ॥ नक्षत्राणि पूजयेत् ॥ २८ ॥ योगाय ॥ करणाय ॥ ध्रुवाय ॥ नदीभ्यां ॥ वनीभ्यां ॥ सागराभ्यां ॥ २
ततो ग्रहपूजनं । अथेत्यादि । ॐ नमस्कृतस्य विवाहोत्सवकर्मप्रारंभनिमित्तं परमाभ्युदयार्थं
आदित्यादिनवग्रहकृतविघ्नबाधोपशान्त्यर्थं अस्मिन् क्रियमाणे ग्रहशान्तिकर्मणि आदि
त्यादीनां नवानां ग्रहाणां स्थापितदेवतासहितानां पूजनार्चनमहं करिष्ये । ततः आकृष्णे
नेत्यादिभिर्मंत्रैः ग्रहाणां पूजनं । तत्र प्रयोगः ॥ ... आकृष्णेन । आदित्याय सांगाय सदस्त्रादि पूजा
एवं सोमाय ॥ भौमाय ॥ बुधाय ॥ बृहस्पतये ॥ शुक्राय ॥ शनैश्चराय ॥ राहवे । केतुभ्यः ॥
ततः देवानां अधिदेवतानां ... स्थापितदेवतासहितानां स्थापनमंत्रैर्वा नाममंत्रै २२
र्वा पूजयेत् ॥ ॐ त्र्यंबकं यजामहे । ॐ रुद्राय नमः ॥ चंदनं । पुष्पं । धूपं । दीपं । नैवेद्यं यथोक्तं । आदि
त्यादिभ्यो नवग्रहेभ्यः स्थापितदेवतासहितेभ्यो ब्रह्मविष्णुरुद्रसहितेभ्यः नैवेद्यं परिकल्पयामि ।
पर्वताभ्यां ॥ रेवंताय ॥ गरुडाय ॥ रुद्राय ॥ विष्णवे ॥ प्रजापतये ॥ वास्तुपुरुषाय ॥ क्षेत्रपालाय ॥ चामुंडायै ॥ मातृमंडलाय ॥
ऋग्वेदाय ॥ यजुर्वेदाय ॥ सामवेदाय ॥ अथर्ववेदाय ॥ ततः ... पूजयेत् इंद्रादि ॥ २ ॥ सर्वं पुष्पाणि पूजयेत् ॥ धूपादि सर्वसमा
नं २

अर्घः । पत्रं पुष्पं । लं । आदित्याद्या ग्रहाः सर्वे पीठे यत्र प्रतिष्ठिताः । ते मे कुर्वन्तु मया दत्तं इमं अर्घं
नमो नमः । आदित्यादिनवग्रहाणां इदं नारिकेरसमयं अर्घं समर्पयामि । आयुर्विद्यां धनं दा
नयन्तः सौख्यं च पुष्कलां । पुत्रान् दारान् धनं दत्त सर्वान् कामांश्च दत्त मे । ग्रहा राज्यं प्रयच्छन्ति ग्रहा रा
ज्यं हरन्ति च । ग्रहैस्तु व्यापितं सर्वं त्रैलोक्यं सचराचरं । अनया सत्या पूजया भगवन्तः आदि
त्यादिनवग्रहाः स्थापितदेवताः प्रीयन्तां । अस्य आदित्यादिनवग्रहपूजनसमृद्ध्यर्थं यथा
सं[illegible]ख्या कान्त्र आलएवान्न [illegible] अहं मो जपिष्ये । तेन भगवन्तः आदित्यादिनवग्रहाः प्रीयन्तां । अस्य
सतस्य आदित्यादिनवग्रहपूजनकर्मणो यन्न्यूनं यद[illegible]तिरिक्तं सर्वं परिपूर्णमस्तु । मम स
परिवारस्य आदित्यादिनवग्रहाः शान्तिकाः सन्तु प्रजा वा तिथि पुष्टिदा वरदा भवन्तु । गृहे मस्तु ।

बटप्र २

अत्र वह्निपूजा। कपिलाय नमः।१ पिंगलाय।२ धूम्रकेतवे।३ जठराग्नये।४ शिखिने।५ हाटकाय।६

महातेजाय।७ कृताह्वानाय नमः।८ ततो बलिदानं। आतारमिन्द्र० इन्द्राय नमः। इन्द्रानुच

रेभ्यो नमः। भो इन्द्र एष माषबलिं न हृदिर्यांरक्ष मम गृहे सुकृतं बस्य आयुःकर्ता पुष्टिकर्ता भव।

एवं सर्वत्र ज्ञेयं। त्वं नो अग्ने। अग्नये।१ सुगन्नु पथां। यमाय।२ असुन्वन्तं। निर्ऋतये।३ तत्त्वा

यामि। वरुणाय।४ आ नो नियुद्भिः। वायवे।५ वयं सोम। सोमाय।६ तमीशानं। ईशानाय।७ अस्

मे रुद्रा। ब्रह्मणे।८ स्योना पृथिवी। अनंताय नमः।१० इति बलिदानं।। ततः पूर्णाहुतिः। चरु १२

गृहीतग्रहणं सता। तदुपरि ताम्बूलसहित नालिकेरं स्थाप्य स्रुक्पातीत्यन्तु वाकेन घृतेन

अविच्छिन्नधारया। ततः उच्छमीमस्येति। पुनस्त्वादित्येति मंत्रेण नालिकेर होमः। इति

12

होमरनिवेदनं। यथा। अस्मिन्नकर्मणि आघारादि पूर्णाहुतिपर्यंतं। यद्यद्द्रव्यं यावद्यावत्संख्या
कं येन येन मंत्रेण हुतं तत्तद्द्रव्यं तावत्तावत्संख्याकं येन मंत्रेण हुतं तस्यै तस्यै देवतायै सा सा
देवतास्तु प्रतिष्ठितावरदा भवंतु॥ पंचागरूढं उपआचार्यस्य॥ ततो यजमानं अग्नेः पश्चि
मतः सपरिवारसहितमुपविश्य कलशोदकेनाभिषिंचेत्। तत्र मंत्रः आपोहिष्ठा ककुउ ऋचं।
आतारमिंद्र १ वरुणस्योत्तंभनं १ नगप्रणोत १ इदमापः १ समुद्रायत्वा १ पुनंतुमा १ आप्या
यस्व १ पंचनद्यः १ त्रिरामे श्रीस्मिति पंच ५ देवस्य त्वा ३ इतयेन वाभिषिंच्य। सुरास्त्वेत्यादि
भिः पौराणिकैरभिषेकः॥ यथा। सुरास्त्वामभिषिंचंतु प्रयच्छंतु धनानि च॥ नारायणो ऽ
रायश्च तथा संकर्षणो विभुः। प्रद्युम्नश्चानिरुद्धश्च यच्छंतु ते सदा॥ इंद्रो वह्नि

यमश्चैव नैरृत्यो वरुणस्तथा च वायुः कुबेरो रुद्रश्च दिक्पालाः पांतु ते सदा ॥ आदित्या व
सवो रुद्रा विश्वेदेवा मरुद्गणाः ॥ १३ लोकपालाः प्रयच्छंतु मंगलानि त्रियंयक्षाः ॥ गंधर्वाः
किन्नरा यक्षाः सिद्धा विद्याधरा गणाः ॥ १४ अश्विनं दंतु ते सर्वे पितरश्चा देवयोनयः ॥ वेद
शास्त्रपुराणानि मीमांसाः षट्दशागमाः ॥ पृथ्वीकथादि ये चान्ये तव कष्टं व्यपोहंतु ते
नारदाद्या ऋषिगणा ये चैवान्ये वा तपोधनाः ॥ १५ भवंतु यजमानस्य आशीर्वादपरायणाः ॥
13 गायत्री चैव सावित्री [illegible] चाप्लक्ष्मी सरस्वती ॥ मृडानी मातरः सर्वा भवंतु वरदास्तथा ॥
संवत्सराश्चैव मासाश्च तिथिवाराश्च नाडिकाः ॥ मुहूर्तान्यभिषिंचंतु नक्षत्राणि दिवा १३
निशं ॥ आदित्यश्चंद्रमा भौमश्च बुधो जीवः सितोर्कजः ॥ ग्रहास्त्वामभिषिंचंतु राहुकेतुश्च

तारकाः ॥ पातालं सप्तकं चोर्द्ध्वं सप्तद्वीपावनी तथा। सागरैः सप्तभिर्युक्ता सप्तलोकसमन्वि
ता ॥ पातु नः पृथिवी पुण्या वस्त्रौषधिसमन्विता ॥ नंदा सुनंदा सुरभी सुशीला सुमनास्त
था। पंच गावः प्रसीदं तु सप्त द्रुमयतनोऽन्विता ॥ त्रयस्त्रिंशत्कोट्यस्तु देवताः स्वर्गवासि
नः ॥ चतुराशीतिकोट्यस्तु अप्सरसां मनोरमाः ॥ नवनवतिकोट्यस्तु यक्षाणां विघ्नरू
पिणां। सार्द्धाष्टकोट्य भूतानां अश्वमेधादि कर्मणां ॥ इत्येते देवताः स्वर्गे भूमिवेधैः समन्वि
ताः यच्छंतु यजमानस्य चिंतितार्थान् मनोरथान् ॥ इत्येवं रुद्रकुंभेन कर्तारमभिषिंच
येत् ॥ ततः दीर्घमायुरस्त्वित्यादि अभिषेकः ॥ अस्य नवग्रहमखयुतविनायकशांतिक
र्मणः सांगतासिद्ध्यर्थं अयाशं पंचनाचेन यथासंख्याकां ब्राह्मणान् अहं तर्पयिष्ये।

स्वेर्द्धेनुः प्रदातव्या ॥ शंखं सोमाय दापयेत् ॥ अंगारकमनड्वाहं बुधे वै कांचनं स्मृतं ॥ पीतवस्त्रयुगं जीवे ।
श्वेताश्वो भार्गवं दत्तः ॥ कृष्णां गां च शनैश्चरे ॥ राहोर्दद्यात् लोहायसं ॥ केतूनां तु तथा छागं सर्वेषामेव
कांचनम् ॥ २

अस्य नवग्रहमखयुतविनायकशांतिकर्मणः सांगतासिद्ध्यर्थं हिरण्यदक्षिणां गुरवे तु-
भ्यमहं संप्रददे । आदित्यादीनां ग्रहाणां [illegible] ग्रहजनितपीडोपशांत्यर्थं इदं ... दक्षि-
णां आचार्याय ऋत्विग्भ्यो ऽहं संप्रददे ॥ अथवा सुवर्णमेव दक्षिणा ॥ ततो भूयसी दक्षिणा ॥
दक्षिणाः पांत्वित्यादि० स्वस्ति । अस्य नवग्रहमखयुतविनायकशांतिकर्मणो यन्न्यू० र्णं ।
15 मस्तु । गृहे० मस्तु ॥ ततो यजमानः सर्पिकृताकृताद्युपहारं नैवेद्यं गृहीत्वा चत्वरे गत्वा ।
भूसंस्कारं कृत्वा । आचमनं प्राणायामः । अपवित्रेत्यादि० । अस्मिन् क्रियमाणे विनायक- २४
शांतिकर्मणि ग्रहशांतिकर्मणि च विनायकोपसर्गनिवृत्त्यर्थं पुराणोक्तैर्मंत्रैश्चत्वरे कू-
र्पमोचनमहं करिष्ये । इज्या । भगवताभ्यः चत्वरदेवताभ्यः इदमत्र । इदं चंदनं । पुष्पं ॥

शूर्पमस्तके धृत्वा उपतिष्ठेत् ॥ तत्र मंत्रः ॥ वलिं गृह्णंतु मे देवा आदित्या वसवस्तथा । मरुतोश्वा
15 श्विनो रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥ असुरा यातुधानाश्च पिशाचा मातरो गणाः ॥ शाकिन्यो यक्ष
वेतालायोगिन्यः पूतनाः शिवाः ॥ जृंभकाः सिद्धगंधर्वा मालाविद्याधरा नगाः ॥ दिक्पाला लो
कपालाश्च ये च विघ्नविनायकाः ॥ जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः ॥ मा विघ्नं मा
च मे पापं मा संतु परिपंथिनः ॥ सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहाः ॥ ततः उपविश्य
वामहस्तेन शूर्पं स्पृष्ट्वा दक्षिणहस्तेन जलं गृहीत्वा । इदं वैणवः शूर्पस्थं ललाटेनाधुप
हारजातं नैवेद्यं भगवतीभ्यः उक्तदेवताभ्यः आदित्यादिदेवेभ्यो नमः ॥ ततः नमस्कृत्य गृहा ह्रि २
गमनं ॥ ग्रहाणां विसर्जनं । तदुपदानं गुरवे देयात् ॥ इति सग्रहविनायकशांतिः ॥ गोपालकृष्णस्य ॥

ता२

विनायकशांतिः

सग्रहविनायकशांति २००

गोपालजीविभागे

२१